तस्याऽरोग्यं धनं धान्यमिह जन्मनि जायते ॥
परत्र च शुभं स्थानं यद्गत्वा न निवर्त्तते ।”

सप्तम्यां समुपोषित इति आदिकर्म्मणि क्तः । तेन सप्तम्यां समुपवस्तुमारब्धवानित्यर्थः । ततश्च प्रातः सप्तम्यामेवोपवाससङ्कल्पः । रविश्च विष्णुरूपतया पूजाकाले ध्येयः । अभिलापे तु तत्तिथावित्युक्ता आरभ्येति ऐहिकारोग्यधनधान्यपारलौकिकशुभस्थानलाभकामः संवत्सरं यावदारोग्यव्रतमिति विशेषः । ततः प्रभृति सप्तम्यामुपवासं कुर्व्वन् ।

“आदित्य भास्कर रवे भानो सूर्य्य दिवाकर ।
प्रभाकर नमस्तुभ्यं अस्माद्रोगाद्विमोचय ॥”

इति मन्त्रेण पूजयेत् । अत्र षष्ठ्यादिषु तत्तत्कर्म्मविधानात् षष्ठीसमेतेत्यस्य न विषयः । कालिकापुराणे भक्तं प्रति सूर्य्यवाक्यम् ।

“अदृष्ट्वा मां न भुञ्जीत विश्वमूर्त्तं नैव दर्शयेत॥”

तथा ।

“मदर्च्चाधृतनिर्म्माल्यं शरीरे न तु धारयेत् ॥”

अर्च्चा प्रतिमा ॥ * ॥ अथ विधानसप्तमी । कृत्यचिन्तामणौ ।

“अर्काग्रं शुचि गोमयं सुमरिचं तोयं फलञ्चाश्नुते
मूलं नक्तमुपोषणञ्च विधिवत् कृत्वैकभक्तं नरः।
क्षीरं वायुशनं घृताशनमिति प्रोक्तान्यमूनि क्रमात्
कृत्वा ~~द्वश सप्तमीर्दिनकृतः प्राप्नोत्यभीष्टं फलम् ॥”

अत्र चार्काशादीतरभोजननिवृत्तिरवसीयते । तपस्त्वात् । तथा च मत्स्यपुराणम् ।

“तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः ।
दुर्भगत्वं वृथा लोको वहते सति साधने ॥”

तपसः क्लेशस्वभावत्वं तत्रैवोक्तम् ।

“उमेऽतिचपला पुत्रि न क्षमं तावकं वपुः ।
सोढुं क्लेशस्वभावस्य तपसः सौम्यदर्शने ॥”

व्यक्तमुक्तं यथा,—

“अर्कपत्राङ्कुरस्तात्रमन्तरीचन्द्रशीलकम् ।
कपिलाविड्‌यवमात्रं मञ्जुलं मरिचं जलम् ॥
कदलीफलमध्यन्तु कणामात्रमपक्वकम् ।
कुशमूलं यवमात्रं स्वच्छायाद्विगुणे क्षणे ॥
भक्ष्यं मितौदनं नक्तं शुद्धोपवसनं तथा ।
एकभक्तं मयूराण्डप्रमाणं भोजनं मतम् ॥
अर्द्धप्रसृतिमात्रन्तु कपिलादुग्धभक्षणम् ।
स्नात्वा सम्पूज्य मार्त्तण्डं प्राङ्‌मुखो वायुमाशयेत् ॥
घृतं स्वल्पं पौषमासे माघादब्दं समाचरेत् ।
ब्राह्मणान् भोजयेद्भक्त्या गुड़क्षीरनिरामिषैः ॥
विप्राय दक्षिणा देया विभवस्यानुरूपतः ।
अष्टम्यां पारणं कुर्य्यात् कटुक्षाररहितेन च ॥
मुद्गमाषतिलादीनि घृतञ्चैव विवर्ज्जयेत् ।
एकसिद्धं भक्ष्यमुक्तमर्कतन्त्रानुसारतः ॥”*॥

एतद्व्रतस्य माघादिमासविशेषविहितकर्म्मत्वेन मलमासेतरकर्त्तव्यत्वं आह वशिष्ठलिङ्गपुराणम् ।

“प्रारब्धे तु व्रते पश्चात् सम्प्राप्ते त्वधिमासके ।
पूर्व्वमानेन तं त्यक्त्वा कार्य्यं द्वादशमासिकम्॥”

पूर्व्वमानेन मलिम्लुचशून्याब्दमानेन । तं मलमासम् । द्वादशमासिकं द्वादशमासेष्वेव कार्य्यं न मलमास इत्यर्थः । यत्तु ।

“मासि मलिम्लुचेऽप्येवं यजेद्देवो सशङ्कराम् ।
किन्तु नोद्यापनं कार्य्यमित्याह भगवान् शिवः ॥”

इति विष्णुरहस्यवचनम् ॥

तन्मासविशेषानङ्कितमासमात्रकर्त्तव्यामावास्यादिव्रतकर्त्तव्यतापरम् । उद्यापनं प्रतिष्ठा । एवमारम्भोऽपि निषिद्धः । गार्ग्यः ।

“अस्तं गते गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
उपायनमुपारम्भं व्रतानां नैव कारयेत् ॥”

उपायनं प्रतिष्ठा । उपारम्भमारम्भम् । एतच्च काम्याशुद्धिमात्रपरं तत्तन्मात्रविधिकल्पने गौरवात् ॥*॥ भविष्ये ।

“भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या ।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम्
पूजयेच्च तदा तस्या दुष्प्राप्यं नैव विद्यते ॥”

इदं कुक्कुटीव्रतत्वेन ख्यातम् ॥*॥ भविष्ये ।

“सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥”

कोटिभास्करा कोटिसप्तमीतुल्या । सूर्य्यग्रहणफलं स्नानजं सन्निहिते बुद्धिरन्तरङ्गेति न्यायात् तेन बहुशतसूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिः फलमत्र ज्ञेयम् । अत्र बहुशतसूर्य्यग्रहाणां प्रत्येकाधिकरणतासंसर्गेणान्वयात् कालानां स्नानानां तत्फलानामपि बहुशतत्वं लभ्यते अतो नाप्रसिद्धिः । पूर्णसप्तम्यां पूर्व्व परयोर्व्वारुणोदयकाले सप्तमी पूर्व्व दिने तत्काले स्नानम् ।

“चतस्रो घटिका प्रातररुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ॥
त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते ॥”

इति काललाघवीयधृतब्रह्मवैवर्त्तीयेन पूर्व्वस्य तत्कालस्य पूर्व्वतिथिसम्बन्धिदिनकर्त्तव्यकर्म्माङ्गत्वेन इतरस्य चेतराङ्गत्वेनाभिधानात् अतएव दक्षेण तत्कालमारभ्याह्निककृत्यमभिहितम् । अत्रारुणोदयकाले मुहूर्त्तान्यूनतिथिलाभ एव स्नानम् ।

“व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।
उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी॥”

इति विष्णुधर्म्मोत्तरात् ।

अत्र घटिका मुहूर्त्तं श्राद्धयोग्यकालानुरोधात् इति वक्ष्यते । ब्रह्मवैवर्त्तवचने घटिका दण्डरूपा परवचने नाड़ीनामाद्यन्तचतुष्टयमित्येकवाक्यत्वात् ॥ * ॥ ये तु सूर्य्योदयात् प्रागपि प्रातःस्नानविधानात् तत्रैव माघसप्तम्याख्यगुणफलविधिर्लाघवादित्याहुस्तच्चिन्त्यम् । प्रकरणान्यत्वे प्रयोजनान्यत्वं इति जैमिनिसूत्रेण प्रकरणभेदे गुणविध्यसिद्धेः । अतएव कल्पतरुरत्नाकरयोः ।

“य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ॥”

इति विष्णुस्मृतौ नित्यस्नानप्रकरणात् प्रकरणान्तराम्नानात् प्रकरणान्तराधिकरणन्यायेन काम्यस्नानान्तरमिदमित्युक्तं न तु गुणफलविधिः । किन्तु काम्यकरणे प्रसङ्गान्नित्यसिद्धिरिति । अत्र माघमासनिमित्तकमाघसप्तमीनिमित्तककाम्यस्नानयोः प्रातर्व्विधानात् नैमित्तिकत्वेन प्रायश्चित्तवत् सकृदनुष्ठानम् ।

“प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः ।
तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया ॥”

इति कात्यायनवचनात् ॥

“न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥”

इति मनुवचनेनैकदाजस्रस्नाननिषेधाच्च ।

“धर्म्मविन्नाचरेत् स्नानमाह्निकञ्च पुनःपुनः ।”

इति मनुवचनाच्च ।

अतएव नान्दीमुखप्रकरणशेषे प्रधानानामपि काम्यानां तत्तद्देशकालविहितानां तन्त्रेणैव सिद्धिरिति श्राद्धचिन्तामणिः । निष्कामविष्णुप्रीतिकामयोः सुतरां सकृदनुष्ठानं गुणतारतम्यात् फलतारतम्यं इति न्यायेन फलं बोध्यम् । तत्तु इक्षुक्षीरगुड़ादिमाधुर्य्यभेदवन्निर्द्देष्टुमशक्यम् ।

“पक्षान्तरेऽपि कन्यास्थे रवौ श्राद्धं प्रशस्यते ।
कन्यागते पञ्चमे तु विशेषेणैव कारयेत् ॥”

इति हेमाद्रिधृतादित्यपुराणोक्तवत् । एतद्वचनप्रागद्धं कार्त्तिकमलमासाब्दविषयम् ।

“देशकालाश्रमच्छेत्रद्रव्यदातृमनोगुणाः ।
सुकृतस्यासि दानस्य फलातिशयहेतवः ॥”

इति ब्रह्मपुराणोक्तवच्च ।

तीर्थभेदे त्वेकदापि नानास्नानम् ।

“विषुवद्दिवसे प्राप्ते पञ्चतीर्थी विधानतः ।”

इति ब्रह्मपुराणादिवचनात् तीर्थभेदे तन्त्रप्रसङ्गयोरसम्भवाच्च । अतएव गङ्गावाक्यावलीश्राद्धचिन्तामण्योः । यत्तु प्रयागे त्र्यहस्नानक्रोड़ीकृतेऽपि माघसप्तमीस्नानादावसाधारणसङ्कल्पेन पुनस्तथैव प्रातःस्नानाचरणं तदयुक्तम् । तदा सकृत्स्नानस्यैव विहितत्वात् अन्यथा तत्राद्यफलकामनायां तदानन्त्यापत्तेरित्युक्तम् ।*। स्नाने परिपाटीमाह कृत्यकल्पलतायां विष्णुः । सप्तबदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय ।

“यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।